International Journal of Sanskrit Research 2020; 6(2): 272-275

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2020; 6(2): 272-275
© 2020 IJSR
www.anantaajournal.com
Received: 08-01-2020
Accepted: 10-02-2020

**अमितदासः**
संस्कृतविभागः,
गौड़वङ्गविश्वविद्यालयः
मालदा, पश्चिमवङ्गः

**गवेषकः**
संस्कृतविभागः,
गौड़वङ्गविश्वविद्यालयः
मालदा, पश्चिमवङ्गः

**Corresponding Author:**
**अमितदासः**
संस्कृतविभागः,
गौड़वङ्गविश्वविद्यालयः
मालदा, पश्चिमवङ्गः

# साहित्यदर्पणे रसवादस्य स्थितिः

**अमितदासः, गवेषकः**

**सारः**

'न हि रसादृते कश्चिदर्थः प्रवर्तते' इति भरताचार्यः। भरतेन सर्वप्रथमेव रससूत्रं प्रणीतम् – 'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः'। संस्कृतालंकारशास्त्रे रसस्य सर्वातिशायि प्राधान्यम् अभ्युपगतम्। आनन्दवर्धनोऽपि ध्वनिप्रस्थानस्य प्रतिष्ठामुखेन रससादस्य महत्त्वमङ्गीकृतम् । ध्वनेः त्रिविधत्वं स्वीकुर्वतापि रसध्वनेः सर्वातिशायित्वम् अभ्युपगतम् – 'वस्त्वलंकारध्वनी रसध्वनौ पर्यवस्येते'। 'रसो हि परमो व्यङ्ग्य' इति आलंकारिकराद्धान्तः। मम्मटेनापि रसस्य युक्तिनिष्ठं व्याख्यानं विहितम्। काव्यप्रकाशस्य चतुर्थे उल्लासे रसस्य स्वरूपमुक्त्वा रसभेदाः उदाहरणपुरःसरम् आलोचिताः। मम्मटोऽपि रसवादस्य प्रवक्तेति। परं विश्वनाथः साहित्यदर्पणे रसवादस्य वलिष्ठं व्याख्यानं चकार। तन्मते रसयुक्तं वाक्यमेव काव्यम् – वाक्यं रसात्मकं काव्यम्।

'रस्यते आस्वाद्यते अनेन' इति रसः। अर्थात् आस्वाद्यत्वं रसधर्मः। सत्वोद्रेके सति रसस्याविर्भावः, स च रसोऽखण्डः, वेद्यान्तरस्पर्शशुन्यः स्वप्रकाशानन्दात्मा, चिन्मयः, लोकोत्तरचमत्कारसारः, ब्रह्मास्वादसहोदरश्चेति। रस एव स्वाकारवदभिन्नत्वेनास्वाद्यते। रस आस्वाद एव, न आस्वाद्यः। तथापि व्यवहारतो रसो ह्यास्वाद्यत इति प्रयुज्यते। रसोऽखण्ड इत्यस्या उक्तेर्व्यापकोऽर्थो विद्यते रसानुभूतो विभावानुभावव्यभिचारिभावानां न पृथक्तया प्रतीतिरपि तु समन्वितानुभूतिः।

रसानुभवो वेद्यान्तरस्पर्शशुन्यो यथा रसो हि नाम पूर्णा तन्मयीभावस्थितिः, तत्र च स्वभावादेव वेद्यान्तरस्पर्शः संभाव्यते। अस्यायमाशयो यद्रसस्थितौ प्रमाता स्वपरततस्थादिभावनाविनिर्मुक्तो भवति। तन्नये, रसस्तावच्चमत्कारसारः।

**मूलशब्दावली –** रसः, रससूत्रम्, रसप्रस्थानम्, रसोत्पत्तिः, भरतः, विश्वनाथः चेति ।

**मूलः प्रबन्धः**

मम्मटाचार्यस्य परवर्तिनि काले रसवादस्य वलिष्ठो व्याख्याकारस्तावत् सहित्यदर्पणकृदाचार्यो विश्वनाथः। सोऽभिनवगुप्ताचार्यमनुसृत्य न केवलं रसवादस्य व्याख्यानञ्चकार, चापि रसस्य प्राधान्यं स्वीकृत्य काव्यस्य स्वरूपं निर्णीतवान्– 'वाक्यं रसात्मकं काव्यम्'[1]। तस्य मते, शब्दार्थमयस्य काव्यस्य स्वरूपनिर्णये केवलं रसस्योपस्थितिरावश्यिकी[2]। वस्तुतः दर्पणकृन्नाट्यकाव्ययोरुभयोर्वाङ्मयक्षेत्रयोः रसस्य प्राधान्यं स्वीकृतवान्[3]। अतः तन्मते, रसहीनं वाक्यम् अकाव्यम्। मूलतो भरतकथितस्य 'न हि रसादृते कश्चिदर्थः प्रवर्तते' इत्युक्तेः प्रतिध्वनिः परिलक्षितो भवत्यत्र। वाक्यस्यापराणि तत्त्वानि स्वतःस्फूर्तरूपेण रसाश्रितानि भवन्तीति विश्वनाथः[4]।

---

1 *साहित्यदर्पणः* (१/३ )

2 काव्यस्य शब्दार्थौ शरीरम्, रसादिश्चात्मा (*साः दः*, वृत्तिः. १/२)

3 रस एवात्मा साररुपतया जीवनधायको यस्य तेन विना तस्य काव्यत्वानङ्गीकारात्. 'रस्यते इति रसः'। (*साः दः*, वृ. १/३)

4 उत्कर्षहेतवः प्रोक्ताः गुणालंकाररीतयः। (*साः दः*, वृ.१/५)
गुणाः शौर्यादिबत्, अलंकाराः कतककुण्डलादिवत्, रीतयोऽयवसंस्थानबिषेषवत् देहाद्वारेण, शब्दार्थद्वारेण तस्यैव काव्यस्यात्मभूतं रसमुत्कर्षयन्तः का उच्यन्ते। (*साः दः*, वृ. १/५)

तन्मते, 'रस्यते आस्वाद्यते अनेन' इति रसः। अर्थात् आस्वाद्यत्वं रसधर्मः। परं तेन रसोत्पत्तिप्रक्रिया व्याकृतेत्थम् - विभावेन अनुभावेन सञ्चारिणा च व्यक्तो रत्यादिः स्थायिभावः सचेतसां हृदये रसतामेति इति। रसस्य स्वरूपविषये विश्वनाथः प्राह –

'सत्त्वोद्रेकादखण्डस्वप्रकाशानन्दचिन्मयः।
वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरः।।
लोकोत्तरचमत्कारप्राणः कैश्चित् प्रमातृभिः।
स्वकारवदभिन्नत्वेनायमास्वाद्यते रसः'[5]।।

अर्थात् सत्वोद्रेके सति रसस्याविर्भावः, स च रसोऽखण्डः, वेद्यान्तरस्पर्शशुन्यः स्वप्रकाशानन्दात्मा, चिन्मयः, लोकोत्तरचमत्कारसारः, ब्रह्मास्वादसहोदरश्चेति। रस एव स्वाकारवदभिन्नत्वेनास्वाद्यते। रस आस्वाद एव, न आस्वाद्यः। तथापि व्यवहारतो रसो ह्यास्वाद्यत इति प्रयुज्यते।
रसोऽखण्ड इत्यस्या उक्तेर्व्यापकोऽर्थो विद्यते रसानुभूतो विभावानुभावव्यभिचारिभावानां न पृथक्तया प्रतीतिरपि तु समन्वितानुभूतिः।
रसानुभवो वेद्यान्तरस्पर्शशुन्यो यथा रसो हि नाम पूर्णा तन्मयीभावस्थितिः, तत्र च स्वभावादेव वेद्यान्तरस्पर्शः संभाबव्यते। अस्यायमाशयो यद्रसस्थितौ प्रमाता स्वपरततस्थादिभावनाविनिर्मुक्तो भवति। तन्नये, रसस्तावच्चमत्कारसारः। चमत्कारो विस्मयस्य पर्यायवाचकः। तथा विस्मयः खलु अद्भुतरसस्य स्थायिभावः। अतः सर्वेषां रसानां मूलं ह्यद्भुतश्चमत्कारो वेति[6]। तथाहि तेनोक्तम् –

"रसे सारश्चमत्कारः सर्वत्राप्यनुभूयते।
तच्चमत्कारसारत्वे सर्वत्राप्यद्भुतो रसः।
तस्माददद्भुतमेबाह कृती नारायणो रसम्"[7]।।

रस आनन्दस्वरूप इति स्वीकृते करुणादौ रसे दुःखमयाद्रसत्वं न सिद्ध्म् इति प्रश्नः। शृङ्गाररसप्रधानम् अभिज्ञानशकुन्तलनाटकं दृष्ट्वा सहृदया आनन्दं लभन्ते, यतो रतिः आनन्दस्वरूपा परं करुणरसस्य स्थायिभावः शोकः इति कृत्वा दर्शकस्यानन्दानुभतिः कथं जायेत? करुणरसो दुःखात्मक इति आपत्तेर्निरसनाय विश्वनाथेनोक्तं – करुणादावपि रसे परं सुखं जायते, तत्र प्रमाणं सहृदयानां हृदयानुभवः – ' सचेतसामनुभवस्तत्र प्रमाणम्'। परन्तु तेषु रसेषु यदि दुःखं जायते, तर्हि न कोऽपि रसप्राप्तावुन्मुखीभवेत्, तथा रामायणादिमहाकाव्यमपि दुःखदायकं स्यादेव। अतः करुणादौ रसेऽपि यदपुर्वं सुखं जायते तत्तु सहृदयस्य चित्तस्यानुभूतिरिति प्रमाणात् सिद्धं –

'करुणादावपि रसे जायते यत् परं सुखम्।
सचेतसामनुभवः प्रमाणं तत्र केवलम्'[8]।।

अलौकिके रसे लौकिकनियमस्य प्रयोगो न युक्तः। करुणरसप्रधाननाट्यास्वादनादलौकिकमानन्दं लब्धुं शक्यते, तदेव सामाजिकानामनुभवसिद्धम्. लौकिके जगति शोकहर्षाभ्यां यथाक्रमेण लौकिके सुखदुःखे जायेते, परन्तु तानि कारणानि काव्ये प्रयुक्तानि चेदलौकिकविभावादिसंज्ञामाप्नोति, अलौकिकानन्दस्योत्पत्तेः कारणञ्च भवति। अलौकिकत्वात्तेभ्यर्विभावादिभ्यो दुःखं परिवर्त्य सुखं जायते -

'हेतुत्वं शोकहर्षादेर्गतेभ्यो लोकसंश्रयात्।
शोकहर्षादयो लोके जायन्तां नाम लौकिकाः।।
अलौकिकविभावत्वं प्राप्तेभ्यः कव्यसंश्रयात्।
सुखं सञ्जायते तेभ्यः सर्वेभ्योऽपीति का क्षतिः'[9]।।

परन्तु यः न हि सहृदयस्तन्निकषा करुणादिभ्यो रसेभ्यः कथम् सुखोत्पत्तिः सम्भवेदिति? अस्य प्रश्नस्य समाधाने विश्वनाथः उक्तवान् – यदि करुणादिभ्यो रसेभ्यः दुःखं जायते तर्हि तेषां रसानाम् आस्वादनार्थं सामाजिकाः प्रवृत्ताः न भवन्तीति न। किञ्च, करुणादौ रसेऽपि सर्वेषाम् आग्रहपूर्विका प्रवृत्तिः परिलक्ष्यते[10]। चित्तविगलिते हृदि सहृदयाः अश्रुवर्षणे सति अपि विभावादिभ्यः कदापि दुःखं न जायते – 'सर्वभ्योऽपि विभावादिभ्यः सुखमेव जायते'[11]। रामस्य रत्यादिस्थायिभावात् सीतारूपालम्बनभावाच्च सामाजिकानां कथं रतिः उद्बुद्धा भवेदिति उक्तेः समाधाने विश्वनाथाचार्यः साधारणीकरणस्य अतीव महत्त्वपूर्णं युक्तिनिष्ठञ्च व्याख्यानं दत्तवान् –

"व्यापारोऽस्ति विभावादेर्नाम्ना साधारणीकृतिः।
तत्प्रभवेन यस्यासन् पाथोधिप्लवनादयः।।
प्रमाता तदभेदेन स्वात्मानं प्रतिपद्यते"।[12]

स्फटिके प्रतिफलितस्य जवाकुसुमस्य रक्तिमेव नाट्यदर्शनकाले अपि सहृदयानां हृदये रामादेः रतिः प्रतिफलिता भवति। तदा आरोपितेन रामेण समम् आत्मानम् अभिन्नम् इति मत्वा रसज्ञः समुद्रे सेतुबन्धनमिव दशाननं रावणम् इति ज्ञात्वा आनन्दं लभते। अत्र विश्वनाथः साधारणीकरणविषये अभिनवगुप्ताचार्यस्य मतं व्याख्यातवान्। 'सीतां प्रति रतिः रामस्य, न नायकस्य रामस्य, पुनः मम, न मम' इत्यत्र रामादिविभावाः सामाजिकानां हृदये विचित्राम् एकाम् अनुभूतिम् उत्पादयन्ति –

"परस्य न परस्येति ममेति न ममेति च ।
तदास्वादे विभावादेः परिच्छेदो न विद्यते"[13]।।

पुनः साधारणीकरणव्याप्यारे स्वीकृते सति विभावादेः अलौकिकता कथं सिद्धेदिति प्रश्नस्य उत्तरेण दर्पणकारः प्राह –

---

[5] *साहित्यदर्पणः*, (३/२-३)

[6] This Vismaya is the primary characteristic of all Rasas; and it means, in the Rasa Adbhuta are
Synthesized all the latter are nothing but the different manifestations of the one Adbhuta. ('*Some Aspects of Literary Criticism in Sanskrit*', A. Sankaran).

[7] *साहित्यदर्पणः*, वृ., (३/२)

[8] *साहित्यदर्पणः* (३/४-५)

[9] तत्रैव (३/६-७)

[10] न हि कश्चित् सचेतन आत्मनो दुःखाय प्रवर्तते। करुणादेः च सकलस्यापि साभिनिवेशप्रवृत्तिदर्शनात् सुखमयत्वमेव। (*साः दः*, वृ.३/५)

[11] तत्रैव (३/७)

[12] तत्रैव (३/९-१०)

[13] *साहित्यदर्पणः* (३/१२)

विभावनादिव्यापारमलौकिकमुपेयुषाम्।
अलौकिकत्वमेतेषां भूषणं न तु दूषणम् ।।[14]

विभावानुभावव्यभिचारिभावाः यथाक्रमेण कारणं कार्यं सहकारिणश्च भूत्वा एतानि सर्वाणि समष्टिरूपेण रसोत्पादने दण्डचक्रादिन्यायेन एकमेव कारणं स्यात् –

“कार्यकारणसञ्चारिरूपा अपि हि लोकतः।
रसोद्बोधे विभावाद्याः कारणान्येव ते मताः”[15]।।

रसास्वादनात् पूर्वं विभावानुभावव्यभिचारिभावाः पृथग्रूपेण रसोद्बोधस्य कारणम्, परन्तु त्रीणि कारणानि यदा व्यञ्जनाशक्त्या परस्परं सम्मिलितरूपेण प्रतीयन्ते, तदा एकप्रतिभासरूपेण परिणतं भवति। तथा रससमानम् अनिर्वचनीयम् आनन्दात्मकमास्वादरूपत्वं धारयति। एते विभावाः रसपदं प्राप्नुवन्ति[16]। विषयोऽयं विशदीक्रियते दर्पणकारेण वृत्तौ – ‘यथा खन्दमरिचादीनां सम्मेलनादपूर्व इव कश्चिदास्वादः प्रपाणकरसः सञ्जायते, विभावादिसम्मेलनादिहापि तथेत्यर्थः’[17]।

‘रसः अनुकार्यरामादिगतः’ इत्यस्य मतस्य अनुवर्तनकारिणां भट्टलोल्लटादीनाम् आचार्याणां मतं खण्डयित्वा दर्पणकारः प्रोक्तवान् – नाट्ये रामादिनायकस्य हृदये रत्याद्युद्बोधो भावो न हि रसः, यतस्तद्भावः सीमितव्यक्तित्वरामादेः सीताविषयकस्य रत्यादिभावस्यानुभवो भवति। किन्तु रसः वस्तुतः असीमितव्यक्तित्वविशिष्टानां सामाजिकानां हृदये साधाराणीकृतस्य रत्यादिभावस्यानुभवः। सीताविषयकस्य रत्यादिभावस्यानुभवो रागद्वेषमोहात्मकः, न तु चमत्कारात्मकः। किन्तु रसानुभवे सति नाट्यस्य मननचिन्तनमेव केवलं साधनं-

“परिमित्याल्लौकिकत्वात् सान्तरायतया तथा।
अनुकार्यस्य रत्यादेरुद्बोधो न रसो भवेत्”[18]।।

वृत्तौ स्पष्टीकृतवान् दर्पणकारो यत् सीतादिनायिकायाः दर्शनेनोत्पन्नो रामादिनायकगतो रत्यादिर्भावोद्बोधः परिमितः, लौकिकश्चमत्कारशून्यश्चेति। परन्तु नाट्यदर्शनाय विघ्नमयोऽनुभवो यो रसरूपानुभवो भवितुं न शक्यते। रसानुभवोऽपरिमितोऽलौकिको निर्विघ्नश्च एव[19]। अतः ‘रसः अनुकरणीये रामादिचरित्रे अनुभूयते’ इति भट्टलोल्लटस्य मतस्यास्य खण्डनं कृतं विश्वनाथेन। ततो व्यञ्जनावृत्त्या सहृदयानां हृदये रसोऽनुभूयत इति साधारणीकरणसिद्धान्तोऽप्रतिष्ठितस्तेन। ‘परस्य न परस्येति ममेति न ममेति’ कृत्वा सहृदयानां हृदये अनुभावेन रामादिनायकेन समम् अभिन्नत्वं प्राप्यते। तस्मात्ते सहृदया अलौकिकत्वं, चमत्कारसारत्वं, ब्रह्मानन्दसहोदरत्वरूपं रसत्वं प्राप्नुवन्ति।

‘रसोऽनुकर्ता नटादिगतोऽनुभवः’ इत्याचार्यस्य शङ्कुकस्य सिद्धान्तस्य खण्डनं कृत्वा उपस्थापयति विश्वनाथः – रङ्गमञ्चे केवलं कौशलादिदर्शनमात्रेण (अभिनयेन) स्वयं रामादिरूपेण प्रदर्शनकारी नटः रसास्वादको न भवितुं शक्यते। यतो यदि अनुकर्तरि नटे रसोत्पन्नो भवेत्, तर्हि तस्यां स्थितौ स न नटो भवेत्, अपि तु स सहृददः सामाजिको भवेत्।[20]

मम्मटाचार्यम् अनुसृत्य विश्वनाथोऽपि शान्तरसस्य समर्थकः। शान्तरसस्य स्थायिभावस्तावत् शम :[21]। किन्तु मम्मटमते निर्वेदः शान्तरसस्य स्थायिभावः[22]। भरतमुनिसम्मतो वात्सलश्च दशमो रसः। ततश्चमत्कारस्य स्फुटतया रसत्वम् अस्त्येव। अत्र वात्सल्ये रसे स्थायिभावः वात्स्यलतास्नेहः, पुत्रादिकम् आलम्बनं, पुत्रादीनां चेष्टा उद्दीपनम्, शिरश्चुम्बनादीनि अनुभावाः अनिष्टशङ्कादीनि व्यभिचारिणः सन्ति। तदुक्तम् -

“स्फुटं चमत्कारितया बत्सलं च रसं विदुः।
स्थायी वात्सलतास्नेहः पुत्राद्यालम्बनम् मतम्”।।[23]

वस्तुतः काव्यस्य जनिः रसादेव। काव्यं स्वयमेव रसमयं भवति। तस्य च लक्ष्यमपि रसनिष्पत्तिरेव भवति। अतः विश्वनाथमते, काव्ये रस एव प्राणभूतः, रस एव आत्मस्वरूप चेति। विश्वनाथनये, रस्यते इति रस इति व्युत्पत्तियोगाद्रसपदेन पानकवद् आस्वाद्यमानत्वाद्भाव-भावाभास-रसाभासादयोऽपि गृह्यन्ते। एतेन रसस्य व्यापकत्वं प्रतिष्ठापितं विश्वनाथेन इति संक्षेपः।

## सन्दर्भग्रन्थसूची

### क. प्राथमिकोत्सग्रामा


- *अलंकारसर्वस्वम्* (रुय्यकः) (जयरथकृतविमर्शिनीसमुपेतम्) - डः रेवाप्रसाद-द्विवेदी (सम्पा.), चौखाम्बा संस्कृत संस्थान, वाराणसी, 1989 (तृतीयसंस्करणम्)।
- *काव्यप्रकाशः* (मम्मटः) – (प्रथमादिषष्ठोल्लासान्तः), (अनुवादकः व्याख्यातश्च) ड. विमलाकान्तमुखोपाध्यायः, (सम्पा.) विपदभञ्जनपालः, संस्कृतपुस्तकभाण्डारः, कोलकाता, 1427 (प्रथमः प्रकाशः)।
- *काव्यप्रकाशः* (मम्मटः) (बालबोधिनीयुता वामनभट्टविरचिता) – भाण्डारकर-ओरियेन्टाल रिसार्च इनस्टीट्युट, पुणा, 1983।
- *काव्यप्रकाशः* (मम्मटः) (षोड़श-टीकासमेतः) – ज्योत्स्नामोहनः (सम्पा.), नागप्रकाश, 1999 (प्रथमसंस्करणम्)।
- *काव्यादर्शः* (दण्डी) (प्रेमचन्द्रतर्कवागीशकृतः मालिन्यप्रोञ्छनीटीकासमेतः) – चिन्मयीचट्टोपाध्यायः (सम्पा.), पश्चिमवङ्ग राज्य पुस्तक पर्षद्, कलिकाता, 1995।


---

[14] तत्रैव (३/१३)

[15] तत्रैव (३/१४)

[16] प्रतीयमानं प्रथमं प्रत्येकं हेतुरुच्यते। ततः सम्मिलितः सर्वो विभावादिः सचेतसाम्.. । प्रपानकरसन्यायाच्चर्व्यमानो रसो भवेत् ..(*साः दः*, ३/१५ )

[17] तत्रैव (३/१५)

[18] तत्रैव (३/१८)

[19] सीतादर्शनादिजो रामादिरत्याद्युद्बोधो हि परिमितो लौकिको नाट्यकाव्यदर्शनादेः सान्तरायश्च। तस्मात् कथं रसरूपतामियात्। रसस्यैतद्धर्म्म त्रितयविलक्षणधर्मकत्वात्। (*साः दः*, वृ. ३/१७)

[20] शिक्षाभ्यासादिमात्रेण राघवादेः स्वरूपताम्।
दर्शयन् नर्तको नैव रसस्यास्वादको भवेत् ।। (*साः दः*, ३/१९)

[21] शान्तः शमस्थायिभावः उत्तमप्रकृतिर्मतः। (*साः दः*, ३/२४५)

[22] निर्वेदस्थायिभावोऽपि शान्तोऽपि नवमो रसः। (*काव्यप्रकाशः*, ४/८)

[23] *साहित्यदर्पणः* (३/२५१)

- *काव्यालंकारः* (भामहः) – वटुकनाथशर्मा वलदेव-उपाध्यायश्च (सम्पा.), चौखाम्वासंस्कृतसंस्थानम्, वाराणसी,1981(द्वितीयसंस्करणम्)।
- *काव्यालंकारसूत्रवृत्तिः* (वामनः) – श्रीकृष्णसूरिः (सम्पा.), श्रीवाणीविलास प्रेस, श्रीरङ्गम, 1909।
- *ध्वन्यालोकः* (आनन्दवर्धनः) (लोचनटीकासहितः) (प्रथमश्च द्वितीय उद्योतः) - विमलाकान्तमुखोपाध्यायः (सङ्कलितोऽनूदितो व्याख्यातः), अशोककुमारमुखोपाध्यायः (सम्पा.), संस्कृतपुस्तकभाण्डारः, कलकाता, 2008 (परिमार्जितं संस्करणम्)।
- नाट्यशास्त्रम् (भरतः) (अभिनवभारतीटीकोपेतम्) - आर्.एस्.नागरः (सम्पा.), परिमलपावलिकेशन्, देहली, 2003 (पुनः प्रकाशितम्)।
- *रसगङ्गाधरः* (जगन्नाथः) – श्रीपारसनाथद्विवेदी (सम्पा.), सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, 1998।
- *रसगङ्गाधरः* (जगन्नाथः) –प. मदनमोहनझा (व्याख्याकारः), चौखम्बा विद्याभवन, वाराणसी, 2012 (पुनर्मुद्रितं संस्करणम्)।
- *वक्रोक्तिजीवितम्* (कुन्तकाचार्यः) (स्वोपज्ञवृत्तिसमेतम्) - सुशीलकुमार दे (सम्पा.), फार्मा. के. एल. मुखोपाध्याय, कलिकाता (अधुना कोलकाता), 1961 (तृतीया अङ्कनावृत्तिः)।
- *साहित्यदर्पणः* (विश्वनाथः) (कुसुमप्रतिमाटीकोपेतः) – हरिदाससिद्धान्तवागीशः (सम्पा.), कोलकाता, 1967 शकाब्दः (चतुर्थं संस्करणम्)।
- *साहित्यदर्पणः* (विश्वनाथः) (लक्ष्मीटीकासहितः) - कृष्णमोहनशास्त्री (सम्पा.), चौखाम्भा संस्कृत संस्थान, वाराणसी, 2001 (षष्ठं संस्करणम्)।


**ख. गौणोत्साः**


- पाण्डेय, हरिप्रसाद- *रस-स्वरूप विमर्श,* न्यू भारतीय बुक कर्पोरेशन, दिल्ली, 2012 (प्रथम संस्करण)।
- पाण्डेय, लक्ष्मी- भारतीय काव्यशास्त्र रस विमर्श, उर्मिल प्रकाशन, दिल्ली, 2011(प्रथम संस्करण)।
- कुमार, राजेश- *रस विमर्श* , शिवलिक प्रकाशन, दिल्ली, 2017 (प्रथम संस्करण)।
- चक्रवर्ती, मनोज – *संस्कृतकाव्यतत्त्वे रसवाद – उद्भव ओ क्रमविकाश*, संस्कृत पुस्तक भाण्डार, कलकाता, 2009 (प्रथम प्रकाश)।
- शास्त्री, अशोकनाथ – *रस ओ भाव*, संस्कृत पुस्तक भाण्डार, कलकाता, 1405 वङ्गाब्द (प्रथम प्रकाश)।
- मुखोपाध्याय, रमारञ्जन - *रससमीक्षा*, संस्कृत पुस्तक भाण्डार, कलकाता, 1368 वङ्गाब्द (प्रथम प्रकाश)।
- De, S.K. – *History of Sanskrit Poetics*, Firma K L M Pvt. Ltd., Calcutta, 1988. (Second Revised Edition).
- Patnaik, Priyadarshi - *Rasa in Aesthetics*, DK Print world, New Delhi, 2013(3rd Edition).
- Poonam, Dr. - *Rasa Theory An Indian Approach To Western Literature*, VL Media Solutions, Delhi, 2015 (First Edition).